## ६८. माता-पुत्रयोः सम्भाषणम्-II

क्त्वा

माता - प्रदीप ! दुग्धं पीतवान् वा ?

पुत्रः - नैव अम्ब ! तत्रैव अस्ति दुग्धम् ।

माता - तर्हि दुग्धं पीत्वा पठतु । तातः स्नानं कृत्वा उपाहारं स्वीकरोति । तावता भवतः स्थानार्थम् अपि जलम् उष्णं भवति ।

पुत्रः - तथैव करोमि अम्ब ! तातः शीघ्रं स्नानं कृत्वा कुत्र गच्छति ?

माता - अद्य रामनगरे सङ्गीत-कार्यक्रमः अस्ति इति । अतः तातः शीघ्रं स्नात्वा, पूजां कृत्वा, उपाहारं खादित्वा कार्यक्रमार्थं गच्छति इति ।

पुत्रः - अम्ब ! अहमपि विद्यालयतः सायं विलम्बेन आगच्छामि । मित्रस्य जन्मदिनोत्सवः अस्ति । अतः विद्यालयतः मित्रस्य गृहं गत्वा, क्रीडित्वा, नृत्याभ्यासकक्ष्यामपि गत्वा गृहम् आगच्छामि ।

माता - तर्हि अहमपि देवालयं गत्वा, सखीं मिलित्वा, सम्भाषणं कृत्वा आगच्छामि ।